इन्द्रनिष्ठकिञ्चिज्जनकः तत्स्वरूपाजनकत्वे सति तदुद्देशेन क्रियमाणत्वात् ब्राह्मणायदानवदिति वाच्यम् अप्रयोजकत्वात् तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च इन्द्रायस्वाहेत्यत्र न तादर्थ्ये चतुर्थी किन्तु स्वाहादिपद-योगउपपदविभक्तिरेव अन्यथा नमःस्वस्तिस्वाहास्वधेत्यादिसूत्रवैयर्थ्यात् नैवं चतुर्थ्यन्तपदस्य देवतात्वे मानाभावात् चतुर्थीं विनापि इन्द्रो देवतेति व्यवहारदर्शनात् अग्नये कव्यवाहनायेत्यादौ देवताद्वय प्रसङ्गाच्च:” इन्द्र सहस्राच्च इत्यर्थवादस्य “इन्द्रमुपासीत” त्यादिविधिसमभिव्याहारेण ऐकवाक्यतयोपास्यत्वात् देवस्वं नाददीतेत्यत्र देवमुद्दिश्य त्यक्ते शिष्टानां देवस्वत्वेन व्यवहारात् अग्नय इति पदेन नियमतस्त्यागस्य श्रुतिबोधितत्वेन तथात्यागस्य फलहेतुत्वात्। नच वीजाक्षराणां देवतात्वात् तत्रैव शिवादिपदशक्तिग्रह इति वाच्यम् वीजाक्षराणांचतुर्थ्यन्तत्वानियमात् तदप्रतीतावपि प्रकाशितशशिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः। वीजाक्षराणां हविस्त्यागित्वेनानुद्देश्यत्वात् शिवस्य प्रतिमन्त्रं वीजाक्षराणां नानात्वादननुगमेन तत्तत्पदशक्तिग्रहस्याशक्यत्वाच्च नच मूर्त्तिभेदेन शिवशरीराणामननुगतत्वेन तत्रापि न शक्तिग्रह इति वाच्यम्-बाल्यादिना भिन्नशरीरेषु चैत्रत्ववच्छिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य चानुगतत्वात् अदृष्टशून्यस्य चेश्वरस्य न देवतात्वम्। ईशानस्य तद्भिन्न एव”।

**अविघ्न** न० विघ्नं कार्य्यप्रतिबन्धकम् अभावे न०त०। १विघ्नाभावे “अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्त्रिणाम्” रघुः “अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव” भा०व०प० न०ब० २विघ्नशून्ये त्रि० “अविघ्नं गच्छ पन्थानम्” रामा०। अर्थाभावे अव्ययी० ३विघ्नाभावे अव्य०।

**अविचक्षण** त्रि० विरोधे न०त०। विचक्षणभिन्ने मन्दे अपटौ

**अविचार** पु० विचारः अभावे त०त०। १विचाराभावे “अविचारेण कर्त्तव्यम्” स्मृतिः न०ब०। २विचारशून्ये “अविचारपुरे देशे यः पलायति जीवति” हितो०। अवीनां चारो यत्र। ३मेषचारणयोग्ये देशे न विगतश्चारो दूतो यस्य न०ब०। ४चारयुक्ते त्रि०। [विवेकाभावेनाकृते।

**अविचारित** त्रि० न विचारितः। इदं कर्त्तव्यं न वेति

**अविचाल्य** त्रि०न विचाल्यः अन्यथा कार्य्यः। अन्यथाकार्य्यभिन्ने स्थिरैकरूपे। “अविचाल्यमेतदुक्तं तथ्यञ्च भवता वचः” भा०व०प०।

**अविचेतन** विशेषेण चेतना विचेतना प्रा०त० न०ब०। विशेषतोज्ञानशून्ये १संज्ञारहिते २नष्टचैतन्ये। “यद्वाग्वदन्त्यविचेतनानि” ऋ०८,१००,१०।

**अविच्छिन्न** त्रि० न०त०। सन्तते। अविच्छिन्न तैलधारा।

**अविच्छेद** पु० न विच्छेदः अभावे न०त०। १विच्छेदाभावे सन्ततौ न०ब०। २विच्छेदशून्ये सन्तते। विच्छेदो नाम एकजातीयद्रव्यगुणादीनामन्यजातीयेन व्यवधानम्।

**अविज्ञात** त्रि० न०त०। १विशेषेणाज्ञाते “अविज्ञातं तु यत् क्रीतं क्रेता वा यदि वा स्मृतः” नाविजाते जलाशये” इति च स्मृतिः अर्थनिश्चयशून्ये त्रि०२यदधीतमविज्ञातं निगदेनैव पठ्यते” इति वेदानु०।

**अविज्ञातृ** पु० विज्ञाता जीवस्तद्भिलक्षणः। १परमेश्वरे जीवेन हि आत्मनि कर्त्तृत्वाभिमानेन ज्ञातृत्वं कल्पितमिति तद्वासनया च तेन कुण्ठीभूयते ईश्वरस्तु ततो विलक्षणः। “अविज्ञाता सहस्रांशुः” विष्णुस० २तत्तद्विषयज्ञातृभिन्ने त्रि० स्त्रियां ङीप्।

**अविज्ञेय** त्रि० न०त०। १अवेद्ये २इदन्तया विज्ञातुमशक्ये परमेश्वरे पु० स हि प्रमाणान्तरावेद्यतया स्थूलदृष्ट्या न विज्ञेयः।

**अविडीन** न० न विडीनम्। पक्षिणामाभिमुख्येन गमने

**अवित** त्रि० अव—क्त। रक्षिते पालिते च।

**अवितथ** न० वितथं मिथ्या विरोधे न०त०। सत्ये वचनादौ “तदवितथमवादीर्यन्मम त्वं प्रियेति” माघः “य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ” मनुः २तद्वति त्रि०। “अवितथा वितथा सखि ! मा गिरः” माघः।

**अवितर्क्य** न०तर्कयितुमशक्यः। तर्कयितुमशक्ये १श्रौतार्थे। “अचिन्त्याः खलु ये भावा न तांस्तर्केण बाधयेत्” इत्युक्तेः विपरीततर्केणाबाध्यः श्रौतार्थः। २तर्कमात्रेणाविज्ञेये च।

**अवितारिन्** त्रि० वितारो विगमोऽस्त्यस्य न०त० स्त्रियां ङीप्। अनपायिनि “सुमेधामवितारिणीम्”। ऋ०२८,५,६,। “अवितारिणीम् वितारः विगमनमपायः अनपायिनीम्” भा०।

**अवितृ** त्रि०अव—तृच् स्त्रियां ङीप्। रक्षितरि “सखीयतामविता बोधि सखा” ऋ०४,१७,१८, सा नो बोध्यवित्री” ऋ०७,९६,२।

**अवित्त** त्रि० न०त०। १अविख्याते। न०ब०। २धनशून्ये त्रि०

**अवित्ति** स्त्री विद—क्तिन् अभावे न०त०। लाभाभावे